# shrIgovindAShTakaM

# શ્રીગોવિન્દાષ્ટકમ્

## Document Information

Text title : govindAShTakaM

File name : govind8.itx

Category : aShTaka, vishhnu, krishna, vishnu, shankarAchArya

Location : doc_vishhnu

Author : Shankaracharya

Transliterated by : Ashwini Kshirasagar

Proofread by : Ashwini Kshirasagar

Latest update : August 6, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીગોવિન્દાષ્ટકમ્

સત્યં જ્ઞાનમનન્તં નિત્યમનાકાશં પરમાકાશં
    ગોષ્ઠપ્રાઙ્ગણરિઙ્ખણલોલમનાયાસં પરમાયાસમ્ ।
માયાકલ્પિતનાનાકારમનાકારં ભુવનાકારં
    ક્ષ્મામાનાથમનાથં પ્રણમત ગોવિન્દં પરમાનન્દમ્ ॥ ૧॥

મૃત્સ્નામત્સીહેતિ યશોદાતાડનશૈશવ સન્ત્રાસં
    વ્યાદિતવક્ત્રાલોકિતલોકાલોકચતુર્દશલોકાલિમ્ ।
લોકત્રયપુરમૂલસ્તમ્ભં લોકાલોકમનાલોકં
    લોકેશં પરમેશં પ્રણમત ગોવિન્દં પરમાનન્દમ્ ॥ ૨॥

ત્રૈવિષ્ટપરિપુવીરઘ્નં ક્ષિતિભારઘ્નં ભવરોગઘ્નં
    કૈવલ્યં નવનીતાહારમનાહારં ભુવનાહારમ્ ।
વૈમલ્યસ્ફુટચેતોવૃત્તિવિશેષાભાસમનાભાસં
    શૈવં કેવલશાન્તં પ્રણમત ગોવિન્દં પરમાનન્દમ્ ॥ ૩॥

ગોપાલં પ્રભુલીલાવિગ્રહગોપાલં કુલગોપાલં
    ગોપીખેલનગોવર્ધનધૃતિલીલાલાલિતગોપાલમ્ ।
ગોભિર્નિગદિતગોવિન્દસ્ફુટનામાનં બહુનામાનં
    ગોપીગોચરપથિકં પ્રણમત ગોવિન્દં પરમાનન્દમ્ ॥ ૪॥

ગોપીમણ્ડલગોષ્ઠીભેદં ભેદાવસ્થમભેદાભં (ગોષ્ટી)
    શશ્વદ્ગોખુરનિર્ધૂતોદ્ધતધૂલીધૂસરસૌભાગ્યમ્ ।
શ્રદ્ધાભક્તિગૃહીતાનન્દમચિન્ત્યં ચિન્તિતસદ્ભાવં
    ચિન્તામણિમહિમાનં પ્રણમત ગોવિન્દં પરમાનન્દમ્ ॥ ૫॥

સ્નાનવ્યાકુલયોશિદ્વસ્ત્રમુપાદાયાગમુપારૂઢં
    વ્યાદિત્સન્તીરથ દિગ્વસ્ત્રા હ્યુપુદાતુમુપાકર્ષન્તમ્ ।
નિર્ધૂતદ્વયશોકવિમોહં બુદ્ધં બુદ્ધેરન્તસ્થં
    સત્તામાત્રશરીરં પ્રણમત ગોવિન્દં પરમાનન્દમ્ ॥ ૬॥

કાન્તં કારણકારણમાદિમનાદિં કાલમનાભાસં
    કાલિન્દીગતકાલિયશિરસિ મુહુર્નૃત્યન્તં નૃત્યન્તમ્ ।
કાલં કાલકલાતીતં કલિતાશેષં કલિદોષઘ્નં
    કાલત્રયગતિહેતું પ્રણમત ગોવિન્દં પરમાનન્દમ્ ॥ ૭॥

વૃન્દાવનભુવિ વૃન્દારકગણવૃન્દારાધ્યં વન્દેઽહં
    કુન્દાભામલમન્દસ્મેરસુધાનન્દં સુહૃદાનન્દમ્ ।
વન્દ્યાશેષમહામુનિમાનસવન્દ્યાનન્દપદદ્વન્દ્વં
    વન્દ્યાશેષગુણાબ્ધિં પ્રણમત ગોવિન્દં પરમાનન્દમ્ ॥ ૮॥

ગોવિન્દાષ્ટકમેતદધીતે ગોવિન્દાર્પિતચેતા યો
    ગોવિન્દાચ્યુત માધવ વિષ્ણો ગોકુલનાયક કૃષ્ણેતિ ।
ગોવિન્દાઙ્ઘ્રિસરોજધ્યાનસુધાજલધૌતસમસ્તાઘો
    ગોવિન્દં પરમાનન્દામૃતમન્તઃસ્થં સ તમભ્યેતિ ॥

॥ ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતં શ્રીગોવિન્દાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Ashwini Kshirasagar

*shrIgovindAShTakaM*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*